# E – 3362

# B. A. (Classics) (Part – I) Examination -2021

(Compulsory)

Paper First

**साहित्यम्**

Time : Three Hours ] [ Maximum Marks : 75

सूचना :– सर्वे प्रश्नाः समाधेयाः ।

**1.** अधोलिखितेषु केचिद् द्वे पद्ये व्याख्येताम् – 20

i. तीर्थोदकानि समिधः कुसुमानि दर्भान्,
स्वैरं वनादुपनयन्तु तपोधनानि ।
धर्म प्रिया नृपसुता न हि धर्मपीड़ा–
मिच्छत् तपस्विषु कुलव्रतमेतदस्याः ।।

ii. विस्त्रब्धं हरिणाश्चरन्त्यचकिता देशागतप्रत्ययाः,
वृक्षाः पुष्पफलैः समृद्धविटपाः सर्वे दया रक्षिताः ।
भूयिष्ठं कपिलानि गोकुलधनान्यक्षत्रवत्यो दिशो,
निःसन्दिग्धमिदं तपोवनमयं धूमोहि बह्वाश्रयः ।।

iii. शय्या नावनता यथास्तृतसमा न व्याकुलप्रच्छदा
न क्लिष्टं हि शिरोपधान ममलं शीर्षाभिद्यातौषधैः ।
रोगे दृष्टि विलामनं जनयितुं शोभा न काचित् कृता,
प्राणी प्राप्य रूजा पुनर्न शयनं शीघ्रं स्वयं मुञ्चति ।।

iv. पृथिव्यां रावंश्यानामुदयास्तमय प्रभुः ।
अपि राजा स कुशली मया काङ्क्षितबान्धवः

**2.** अधोलिखितस्य एकस्य परिचयो देयः – 10

i. उदयनः

ii. वासवदत्ता

**3.** कस्यचितदेकस्य गद्यखण्डस्य प्रसंगनुसारिणी व्याख्या कर्त्तव्या – 10

i. एवं सम्प्रधार्य भूयोऽप्यचिन्तयत् –"तदहमनशनं कृत्वा प्राणानुत्सृजामि । किमनेन नो व्यर्थजीवितव्यसनेन ? एवं निश्चयं कृत्वा सुप्तः । अथ तस्य स्वप्ने पद्मनिधिः क्षपणकरूपो दर्शनं दत्त्वा प्रोवाच – भोः श्रेष्ठिन्। मा त्वं वैराग्यं गच्छ । अहं पद्मनिधिस्तवं पूर्वपुरूषो पार्जितः । तदनेनैव रूपेण प्रातस्त्वगृहमागमिष्यामि। तत्त्वयाऽहं लगुऽप्रहारेण शिरसि ताऽनीयः येन कनकमयो भूत्वाऽक्षयो भवामि । अथ प्रातः प्रबुद्धः सन् स्वप्नं स्मरंश्चिन्ता चक्रमारूढ़स्तिष्ठति –" अहो, सत्योज्यं स्वप्नः किं वा असत्यो भविष्यति न ज्ञायते । अथवा नूनं मिथ्याऽनेन भाव्यम् । यतोऽहमहर्निशं केवलं वित्तमेव चिन्तयामि ।

ii. अथ तेन वृद्ध वानरेण कुत्रचित्पिपासाकुलेन भ्रमता पद्मिनी खण्डमण्डितं सरः समासादितम् । तद्यावत्सूक्ष्मेक्षिकयाज्वलोकयति तावद् वनचरमनुष्याणां पदपंक्तिप्रवेशोऽस्ति न निष्क्रमणम् । ततश्चिन्तितम्।। "नूनमत्र जलान्ते दुष्टग्राहेण भाव्यम् । तत्पद्मिनीनालमादाय दूरस्थोऽपि जलं पिबामि ।

तथाऽनुष्ठितेतन्मध्याद्राक्षसो निष्क्रम्य रत्नमालाविभूषित कण्ठस्तमुवाच–भोः ! अत्र यः सलिले प्रवेशं करोति स मे भक्ष्यः इति । तन्नाऽस्ति धूर्ततरस्त्वत्समोऽन्यो यः पानीयमनेन विधिना पिबति । ततस्तुष्टोऽहं, प्रार्थयस्व हृदयवाञ्छितम्। ”

ब. कस्यचिदेकस्य पद्यस्य सप्रसंग व्याख्या कार्या– 10

i. वरं बुद्धिर्न सा विद्या विद्याया बुद्धिरूत्तमा ।
बुद्धिहीना विनश्यन्ति यथा ते सिंहकारकाः ।।

ii. इच्छति शती सहस्त्रं सहस्त्री लक्षमीहते ।
लक्षाऽधिपस्तथा राज्यं राज्यस्थः स्वर्गमीहते ।।

**4.** ब्राह्मणी–नकुल कथा लिखत । 10

**अथवा**

चन्द्रभूपति कथा लिखत ।

**5.** केषाञ्चित त्रयाणां परिचयो देयः – 15

i. रघुवंशमहाकाव्यम् ।
ii. कुमारसंभवम् ।
iii. विक्रमांङ्कदेव चरितम् ।
iv. किरातार्जुनीयम् ।
v. बुद्धचरितम् ।
vi. प्रतापविजयम् ।

***